
545

545

श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगल्ली आदिविश्वेश्वरकेपासश्रीयुतबाबूहरखचंदजीकेबाडेमे
दुर्गाप्रसादकटारेकेगणेशयंत्रालयमे पंचदशीसटीकछापीगयीलिखामहेसपाडेछापनेवालापुन्न
वासिजिसैलेनाहोयसोचांदनीचौकमेकुंजगलीकेपश्चिमफाटककेपासदुर्गाप्रसादकटारेकेदुकान
मेमिलैगी॰ सम्वत् १९ २३ मी॰ श्रावणवदी ३ सोमवासरे॰॥

[library stamp]






श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्यक्तत्वविवेकस्य क्रियते पददीपिका १ प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगम
नाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति अर्थाद्विषयप्रयोजने च सूचयति नम
इति शं सुखं करोतीति शंकरः सकलजगदानंदकरः परमात्मा एष ह्येवानंदयतीति श्रुतेः आनंदः निरतिशयप्रेमास्पदत्वेन परमानंदरूपः प्रत्यगात्मा शंकरश्चा
सावानंदश्चेति शंकरानंदः प्रत्यगभिन्नः परमात्मा स एव गुरुः परिपक्व मलापेतान् उत्सादनहेतुशक्तिपातेन योजयति परतत्वे स दीक्षयाचार्यमू
र्तिस्थ इत्यागमात् श्रीमांश्चासौ शंकरानंदगुरुश्चेति गंधहद्विपइत्यादिवत्समासः अनेन श्रीगुरोरणिमाद्यैश्वर्यसंपन्नत्वं सूचितं यद्वा श्रिया भूमा शंकरोतीति श्री
शंकरः रातेर्दातुः परायणमिति श्रुतेः अनेन श्रीगुरोर्भक्तेष्टसंपादनसामर्थ्यं सूचितं भवति तस्य गुरोः पादावेवांबुजन्मकमलं तस्मै नमः प्रह्वीभावोस्तु किंवि

ॐ नमः श्रीशंकरानंदगुरुपादांबुजन्मने सविलासमहामोहग्राहग्रासैककर्मणे १ तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसाम्॥

धाय सविलासमहामोहग्राहग्रासैककर्मणे विलासः कार्यवर्गस्तेन सहवर्तत इति सविलासः एवंविधो यो महामोहो मूलाज्ञानं स एव ग्राहः मकरादिवत्स्वव
शं प्राप्तस्यातीव दुःखहेतुत्वात्तस्य ग्रासो ग्रसनं निवर्तनं स एवैकं मुख्यं कर्म व्यापारो यस्य तत्तथा तस्मा इत्यर्थः अत्र च शंकरानंदपदद्वयसामानाधिकरण्येन जीवब्रह्मणो
रेकत्वलक्षणो विषयः सूचितो जीवस्य भूमब्रह्मरूपतयापरिच्छिन्नसुखाविर्भावलक्षणं प्रयोजनं च सूचितं सविलासेत्यादिना निःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं
मुख्यत एवाभिहितम् १ इदानीमवांतरप्रयोजनकथनपुरःसरं ग्रंथारंभं प्रतिजानीते तत्पादेति तस्य गुरोः पादावेवांबुरुहे कमले तयोर्द्वंद्वं तस्य सेव
या परिचर्यया कृतनमस्कारादिलक्षणया निर्मलं रागादिरहितं चेतोंतःकरणं येषां ते तथोक्तास्तेषां सुखबोधाय अनायासेन तत्वज्ञानोत्पादनायायं वक्ष्य।